# नन्दिघोषरथः

नन्दिघोषो महाप्राज्ञो, जगन्नाथस्य स्यन्दनः ।
पञ्चाङ्गुलोत्तरोदीर्घस्- त्रयस्त्रिंशद्भुजः(स्) स्मृतः ॥ 1॥

द्वात्रिं(म्)शदधिकैरष्ट- शतैश्च काष्ठखण्डकैः।
निर्मितोऽयं(म्) रथः(फ्) पीठः(ख्), कनकमञ्चनामकः ॥ 2॥

सारथिर्दारुकश्चैव, शङ्खचक्रे रथायुधे ।
जय-विजयरूपौ तौ, द्वारपालौ मनोहरौ ॥ 3॥

षोडशसिद्धिचक्राणि, पीतलोहितसुन्दरः ।
शङ्खचूडोरगो रज्जुः(श्), शङ्खचक्रबलाहकः ।
हरिदश्वाश्च घोटकाश्- श्वेतवर्णास्सुशोभनाः ॥ 4॥

रक्षको गरुडस्तत्र, ध्वजस्त्रैलोक्यमोहनः।
विश्वकर्माऽस्य शिल्पी स्यान्- नवाः(स्) स्युः(फ्) पार्श्वदेवताः ॥ 5॥

लक्ष्मीं(म्) सं(वँ)वरयन्दरं(वँ) विदलयं(म्)स्- तापं(म्) महाखण्डयन्
भक्तानाकलयन्सुखं(ञ्) च रसयन्- सम्पालयन्सत्वरम् ।
यात्रां(म्) सं(वँ)वरयन्पहण्डिविलसन्- मास्वादयन्गुण्डिचां(म्),
सम्पश्यन्जगदीश्वरो विलयते,  श्रीनन्दिघोषोपरि ॥ 6॥
गच्छन्तं(म्) रथनन्दिघोषसहितं(म्) प्रस्वादयन्तं(म्) मधुं(म्),
सिञ्चन्तं(म्) सुखशीतलं(ञ्) जलधरं(म्), प्रक्षालयन्तं(म्) मुखम् ।
गुञ्जन्तं(ञ्) जयकारकं(न्) ध्वनिगुणं(न्) धिक्कारयन्तं(म्) शठं(न्),
नन्दन्तं(ञ्) जनमानसं(म्) हरिवरं(वँ) विभ्राजयन्तं(म्) भजे ॥ 7॥

इति नन्दिघोषरथः सम्पूर्णः ।

